**SET – 4**

**Series : TYM**

**कोड नं.**
**Code No.** **52**

**रोल नं.**
**Roll No.**

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **14** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **15** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **14** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम्

## SANSKRIT

*अवधिः : होरात्रयम्* | *पूर्णाङ्काः : 80*

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 80*

*Time allowed : 3 hours* | *Maximum Marks : 80*

| | | |
|---|---|---|
| खण्डः क : | अपठितांश-अवबोधनम् (अपठितांश अवबोधन) | 10 अङ्काः |
| SECTION A : | Unseen Reading Comprehension | 10 Marks |
| खण्डः ख : | रचनात्मककार्यम् (रचनात्मक-कार्य) | 15 अङ्काः |
| SECTION B : | Writing Skills | 15 Marks |
| खण्डः ग : | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | 25 अङ्काः |
| SECTION C : | Applied Grammar | 25 Marks |
| खण्डः घ : | पठित-अवबोधनम् (पठित-अवबोधन) | 30 अङ्काः |
| SECTION D : | Reading Comprehension | 30 Marks |

निर्देशाः

**Instructions :**

*(i)* *अस्मिन् प्रश्नपत्रे* ***चत्वारः*** *खण्डाः सन्ति ।*
*इस प्रश्न-पत्र में* ***चार*** *खण्ड हैं ।*
*The question paper has* ***four*** *sections.*

*(ii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे ।*
*The answers to each section must be written at one place.*

*(iii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।*
*प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी ।*
*Write the question number according to the question paper.*

*(iv)* ***सर्वेषां*** *प्रश्नानाम् उत्तराणि* ***संस्कृतेन*** *लेखनीयानि ।*
***सभी*** *प्रश्नों के उत्तर* ***संस्कृत*** *में लिखिए ।*
*Answer* ***all*** *the questions in* ***Sanskrit.***

## खण्डः – क

## SECTION – A

## अपठितांश-अवबोधनम् (अपठितांश-अवबोधन)

## Unseen Reading Comprehension

10 अङ्काः

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित अनुच्छेद को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following passage and answer the given questions in Sanskrit.

कस्मिंश्चित् ग्रामे कदाचन अशीतिवर्षीयः एको वृद्धः मार्गे आम्रवृक्षान् आरोपयति स्म । तं दृष्ट्वा महानगरात् आगच्छन् कश्चन युवा पृष्टवान् – भो महानुभाव ! तव अवस्था प्रायशः अशीतिवर्षीया प्रतीयते । एतत् च स्वाभाविकं यदा एते वृक्षाः फलानि दास्यन्ति, तदा त्वं जीवितो न भविष्यसि । अतः किमर्थम् इमं निष्फलं प्रयासं करोषि ? स वृद्धः उक्तवान् – मया साम्प्रतम् इतरैः आरोपितानां वृक्षाणां फलानि खाद्यन्ते । एवं मयापि आरोपितानाम् एतेषां वृक्षाणां फलानि आगामिभविष्यत्काले लोकाः खादेयुः – इत्येतदर्थम् अहम् एतेषाम् आरोपणं करोमि । वस्तुतः मनुष्येण केवलं स्वार्थचिन्तनं न कर्तव्यम् ।

**प्रश्ना :**

I. एकपदेनोत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. **½ × 4 = 2**

(i) कश्चन युवा कुतः आगच्छति स्म ?

(ii) मनुष्येण केवलं किं न कर्तव्यम् ?

(iii) 'तरुः' इत्यर्थे कः पर्यायशब्दः अत्र प्रयुक्तः ?

(iv) 'मृतः' इत्यस्य विपरीतार्थकं पदं किम् ?

II. पूर्णवाक्येनोत्तरत ।

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence. **2 × 2 = 4**

(i) वृद्धः किं विचार्य वृक्षाणाम् आरोपणं करोति स्म ?

(ii) युवा तं वृद्धं किम् अपृच्छत् ?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत ।

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।

Choose and write the appropriate answer from the given options. **½ × 4 = 2**

(i) 'आरोपयति स्म' इति क्रियापदस्य कर्तृपदं किम् ?

(क) युवा

(ख) वृद्धः

(ग) वृक्षाः

(घ) लोकाः ।

(ii) 'प्रयासम्' इत्यस्य किं विशेषणम् अत्र प्रयुक्तम् ?

(क) प्रायशः

(ख) निष्फलम्

(ग) युवा

(घ) साम्प्रतम् ।

(iii) 'अधुना' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(क) स्वाभाविकम्

(ख) साम्प्रतम्

(ग) एवम्

(घ) युवा ।

(iv) 'वृद्धः' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(क) जीवितः

(ख) लोकाः

(ग) युवा

(घ) मया ।

IV. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write the appropriate title for this passage in Sanskrit. **2**

## खण्डः – ख

## SECTION – B

## रचनात्मककार्यम् (रचनात्मक-कार्य)

## Writing Skills

**15 अङ्काः**

2. सखीं प्रति लिखितम् अधःपत्रं मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पुनः लिखत ।

सखी को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिए गए शब्दों की सहायता से पूर्ण कर पुनः लिखिए ।

Complete the following letter, written to your friend, with the help of the words given in the box and rewrite the same. **½ × 10 = 5**

शिमलानगरात्

दिनाङ्कः ________

प्रिये शकुन्तले !

सप्रेम (i) __________ ।

अद्यैव तव पत्रं प्राप्तम् । तव अर्धवार्षिकीपरीक्षा (ii) ________ । त्वं च परीक्षापरिणामं (iii) ________ । अत्रान्तरे, त्वं (iv) ________ आगच्छ । अत्र शैत्यं प्रवृद्धम् । (v) _______ प्रारम्भे हिमपातः (vi) ________ । यदा हिमपातो भवति, तदा वृक्षाः वनस्पतयः, राजमार्गाः श्वेतवर्णवस्त्रैः आच्छादिताः इव (vii) _______ शोभन्ते । देशस्य विभिन्नभागेभ्यः (viii) _______ एतद् द्रष्टुम् अत्र आगच्छन्ति । मम गृहे सर्वे (ix) ________ वीक्ष्य प्रसन्नाः भविष्यन्ति । आशासे त्वं नूनम् आगमिष्यसि । गृहे सर्वेभ्यः मम प्रणामाञ्जलयः (x) ________ ।

तव अभिन्नहृदया

प्रियंवदा

**मञ्जूषा**

| |
|---|
| निवेदनीयाः, पर्यटकाः, त्वाम्, नमो-नमः, सम्पन्ना, अतीव, प्रतीक्षसे, सम्भाव्यते, शिमलानगरम्, आगामिमासस्य । |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां साहाय्येन **पञ्च** वाक्यानि संस्कृतेन लिखत ।

नीचे दिए गए चित्र का वर्णन मञ्जूषा में दिए गए शब्दों की सहायता से **पाँच** संस्कृत वाक्यों में कीजिए ।

Describe the following picture in **five** Sanskrit sentences with the help of the words given in the box below. **2 × 5 = 10**



**मञ्जूषा**

| |
|---|
| व्याधः, तण्डुलान्, प्रसार्य, जालम्, प्रासारयत्, वने, वृक्षाः, कपोताः, मिलित्वा, आदाय, नभसि, उड्डीय, अन्यत्र, धावति, नष्टम् । |

**अथवा/OR**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत ।

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर **पाँच** संस्कृत वाक्यों में एक अनुच्छेद लिखिए ।

Write a paragraph in **five** Sanskrit sentences on the following topic with the help of the words given in the box. **2 × 5 = 10**

'स्वतन्त्रता-दिवसः'

**मञ्जूषा**

| |
|---|
| अगस्तमासे, पञ्चदशे, दीर्घकालिक परतन्त्रतानन्तरम्, मुख्यसमारोहः, राजधान्याम्, रक्तदुर्गप्राचीरे, राष्ट्रियध्वजः, प्रधानमन्त्री, विद्यालयीयछात्राः, वातावरणम्, राज्यानां राजधानीषु, अभिवादनम्, आयोज्यते, राष्ट्रियसम्बोधनम् । |

## खण्डः – ग

## SECTION – C

## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)

## Applied Grammar

**25 अङ्काः**

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत ।

निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि अथवा सन्धिविच्छेद करके लिखिए ।

Write the underlined words of the following sentences after joining or disjoining Sandhis. **1 × 4 = 4**

(i) अस्य नाटकस्य नै + अकः कः अस्ति ?

(ii) मदोद्धताः कपयः अवदन् ।

(iii) तस्य राज्ञः एक + छत्रं राज्यम् आसीत् ।

(iv) कृष्णः चलति कुरुक्षेत्रे ।

5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत ।

निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए ।

Choose and write the correct compounded or expounded forms of the underlined words in the following sentences. **1 × 4 = 4**

(क) अद्य राष्ट्रपतेः भवने संस्कृतविदुषां सम्मानसमारोहः आयोज्यते ।

(i) राष्ट्रपतिनिवासे

(ii) राष्ट्रपतीयभवने

(iii) राष्ट्रपतिभवने ।

(ख) कदापि अनृतं न वक्तव्यम् ।

(i) न ऋतम्

(ii) अनृ + क्त

(iii) ऋत + न ।

(ग) माता-पितरौ प्रणम्य परीक्षाभवनं गच्छ ।

(i) माता च पितरौ च

(ii) माता च पिता च

(iii) मातरौ च पितरौ च ।

(घ) एतद् आचरणं साधुजनस्य रूपस्य योग्यं नास्ति ।

(i) रूपयोग्यम्

(ii) रूपस्य निकटे

(iii) अनुरूपम् ।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत ।

निम्नलिखित वाक्यों में रेखांकित पदों के प्रकृति प्रत्ययों को जोड़कर या पृथक् करके उचित उत्तर विकल्पों में से चुनकर लिखिए ।

Write the underlined words of the following sentences after joining or disjoining suffixes to the roots or words, selecting the correct answer from the options given below : **1 × 4 = 4**

(क) आपद्गतेनापि एतद् अस्त्रं मानवेषु न प्र + युज् + तव्यत् ।

(i) प्रयोजनीयम्

(ii) प्रयोक्तव्यम्

(iii) प्रयुक्तम् ।

(ख) भवान् जानाति द्रौणेः चपलाम् प्रकतिम् ।

(i) चपल + टाप्

(ii) चपल + ला

(iii) चपल + आम् ।

(ग) यथासमयं सर्वेषां महत्त्वं विद्यते ।

(i) महत् + त्व

(ii) महान् + त्वम्

(iii) महत् + तु ।

(घ) धैर्यवान् जनः लोके पराभवं न प्राप्नोति ।

(i) धैर्य + मतुप्

(ii) धैर्य + क्तवतु

(iii) धैर्य + शानच् ।

7. अधोलिखितं संवादं मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा पूरयित्वा च पुनः लिखत ।

अधोलिखित संवाद को मञ्जूषा में दिए गए शब्दों की सहायता से वाच्य परिवर्तन करते हुए सम्पूर्ण संवाद पुनः लिखिए ।

Fill in the following dialogue by choosing the right words as per rules of voice. **1 × 3 = 3**

रमेशः – किम् अशोकः पाठं पठति ?

सुधा – आम्, अशोकेन (i) _______ पठ्यते ।

सुधाकर: – किं दिनेशः अध्यापकं नमस्करोति ?

अशोकः – आम्, (ii) _______ अध्यापकः नमस्क्रियते ।

शिक्षकः – किं तव माता आपणात् फलानि आनयति ?

छात्रः – आम्, मम मात्रा आपणात् फलानि (iii) _______ ।

**मञ्जूषा**

| |
|---|
| आनीयन्ते, दिनेशेन, पाठः । |

8. अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूर्यन्ताम् ।

अधोलिखित दिनचर्या में रिक्त स्थानों की पूर्ति कालबोधक शब्दों से कीजिए ।

Rewrite the daily routine using Sanskrit words in place of figures. **½ × 4 = 2**

(i) मम भ्राता प्रातः 5.00 भ्रमणार्थं गच्छति ।

(ii) अहं प्रातः 8.30 कार्यालयं गच्छामि ।

(iii) तव माता मध्याह्ने 2.00 विद्यालयात् आगच्छति ।

(iv) मम जनकः सायं 7.30 गृहं प्राप्नोति ।

9. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखत ।

निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए अव्यय पदों के द्वारा कीजिए ।

Fill in the blanks in the following sentences with appropriate indeclinable words given in the box. **1 × 4 = 4**

(i) किं त्वम् ______ वाराणसीं गमिष्यसि ?

(ii) प्रातः कालः संजातः, _______ निद्रा न युज्यते ।

(iii) सः सर्वं वृत्तान्तं निवेद्य सकरुणम् _______ अक्रन्दत् ।

(iv) अश्वाः प्राणत्राणाय ______ अधावन् ।

**मञ्जूषा**

| |
|---|
| इतस्ततः, अपि, उच्चैः, सम्प्रति |

10. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति । अशुद्धं पदं संशोध्य पुनः लिखत ।

निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध है । अशुद्ध पद को संशोधित कर पुनः लिखिए ।

Correct the underlined incorrect words in the following sentences : **1 × 4 = 4**

(i) द्वे बालिके विद्यालयं गच्छति ।

(ii) किम् अहं सर्वे पुस्तकानि आदाय गच्छानि ?

(iii) विजयः भ्रमणार्थं श्वः न गच्छति ।

(iv) किं शकुन्तला अध्ययने रतः अस्ति ?

## खण्डः – घ

## SECTION – D

## पठित-अवबोधनम् (पठित-अवबोधन)

## Reading Comprehension **30 अङ्काः**

11. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

निम्नलिखित गद्यांश, पद्य और नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।

Read the following prose, poetry and drama passages and answer the given questions in Sanskrit.

(अ) **गद्यांशः**

राजा उवाच – भगवन् ! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि । आदिश्यताम् – 'किं करवाणि ?'

विप्रः उवाच – यदि भवान् प्रीतः तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि, येन मम लोकयात्रा निर्बाधा भवेत् । तत् श्रुत्वा राजा अचिन्तयत् – लोके चक्षुर्दानं दुष्करम् एव । नूनम् ईदृशं दानम् इच्छन् अयं याचकः केनापि प्रेरितः स्यात् । अथवा भवतु नाम । इति विचार्य राजा अभाषत – भो मित्र ! किमेकेन चक्षुषा । अहं भवते चक्षुर्द्वयमेव प्रयच्छामि ।

**प्रश्नाः**

I. एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. **1 × 2 = 2**

(i) 'लोके चक्षुर्दानं दुष्करमेव' इति कः अचिन्तयत् ?

(ii) राजा कम् अनुगृहीतं कर्तुम् इच्छति ?

II. पूर्णवाक्येन उत्तरत ।

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence. **2 × 1 = 2**

विप्रः राजानं किम् उक्तवान् ?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत ।

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।

Choose and write the appropriate answer from the given options : **½ × 4 = 2**

(क) अनुच्छेदे 'लोकयात्रा' इत्यस्य किं विशेषणम् ?

(i) प्रीतः

(ii) निर्बाधा

(iii) चक्षुर्द्वयम् ।

(ख) 'उवाच' इति क्रियापदस्य कर्तृपदं किम् ?

(i) विप्रः

(ii) याचकः

(iii) राजा ।

(ग) 'तव' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(i) भवते

(ii) मम

(iii) विप्रः ।

(घ) 'मम लोकयात्रा' इत्यत्र 'मम' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) राज्ञे

(ii) विप्राय

(iii) लोकाय ।

(आ) पद्यम्

चञ्चलं हि मनः कृष्ण ! प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ।।

**प्रश्ना:**

I. एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. **1 × 2 = 2**

(i) कस्य निग्रहम् अर्जुनः सुदुष्करं कथयति ?

(ii) चञ्चलं किम् अस्ति ?

II. पूर्णवाक्येन उत्तरत ।

पूर्णवाक्य में उत्तर दीजिए ।

Answer in a complete sentence. **2 × 1 = 2**

मनः कीदृशम् भवति ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।

Choose and write the appropriate answer from the given options. ½ × **4 = 2**

(क) श्लोके 'अतिकठिनम्' इत्यर्थे किं पर्यायपदं प्रयुक्तम् ?

(i) चञ्चलम्

(ii) प्रमाथि

(iii) सुदुष्करम् ।

(ख) 'मन्ये' इति क्रियापदस्य कर्तृपदं किम् ?

(i) कृष्णः

(ii) मनः

(iii) अहम् ।

(ग) 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) श्रीकृष्णाय

(ii) अर्जुनाय

(iii) मनसे ।

(घ) 'स्थिरम्' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(i) प्रमाथि

(ii) दृढम्

(iii) चञ्चलम् ।

(ङ) नाट्यांशः

हिमांशुः – अहं चिन्तयामि यत् 'अरुणः' तु सूर्यस्य पर्यायः । अस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति । अतः अरुणस्य प्रदेशः अरुणाचलः ।

पर्यटनाधिकारी – शोभनम् । उचितम् उक्तम् । हिमाद्रितुङ्गशृङ्गैः सुशोभिता सूर्योदयभूमिः इयम् । अतः अरुणाचलः । अस्मिन् प्रदेशे पञ्चाशदधिकाः नद्यः प्रवहन्ति । विपुला च अत्र वनसम्पदा । वनौषधीनां तु अयं स्रोत एव । पुष्पाणां समृद्धिः सुगन्धिः च मनोहरः । शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं प्रकृतिः एव न विविधा मनोहरा च प्रत्युत संस्कृतिः अपि ।

प्रश्नाः

I. एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. **1 × 2 = 2**

(क) अस्मिन् प्रदेशे कति नद्यः प्रवहन्ति ?

(ख) कस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति ?

II. पूर्णवाक्येन उत्तरत ।

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence. **2 × 1 = 2**

अयं प्रदेशः अरुणाचलः कुतः कथ्यते ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।

Choose and write the appropriate answer from the given options. **½ × 4 = 2**

(क) 'स्पृशति' इति क्रियापदस्य कर्तृपदं किम् ?

(i) हिमांशुः

(ii) पर्यटनाधिकारी

(iii) प्रकाशः ।

(ख) 'हिमालय' इत्यर्थे किं पर्यायपदम् अत्र प्रयुक्तम् ?

(i) सूर्योदयभूमिः

(ii) हिमाद्रिः

(iii) स्रोतः ।

(ग) 'दूषित' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(i) समृद्धिः

(ii) मनोहरा

(iii) शुद्ध ।

(ग) 'अयं स्रोत एव' इत्यत्र 'अयम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) सूर्योदयाय

(ii) वनौषधिभ्यः

(iii) अरुणाचलाय ।

12. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत ।

रेखाङ्कित पदों के आधार पर प्रश्न निर्माण कीजिए ।

Frame the questions on the basis of underlined words. **1 × 4 = 4**

(i) शक्रस्य प्रभावेण तस्य एकं चक्षुः प्रतिष्ठितम् ।

(ii) बोधिसत्त्वः शिबीनां राजा बभूव ।

(iii) हा हन्त ! अवधीरिताः अस्माभिः गुरुजनोपदेशाः ।

(iv) मौनं धृत्वा मीनान् क्रूरतया भक्षयसि ।

13. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोक**द्वयस्य** अन्वयं पूरयत ।

मञ्जूषा में से समुचित पद चुनकर निम्नलिखित दोनों श्लोकों के अन्वय को पूर्ण कीजिए ।

Complete the prose order of the following **two** shlokas by choosing the appropriate words given in the box. **½ × 8 = 4**

(i) शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ।।

अन्वयः – यः (i) ______ प्राक् (ii) ______ वेगम् इह एव (iii) _______ शक्नोति सः (iv) _______ युक्तः सः सुखी (भवति) ।

(ii) धनस्य निःसारलघोः स सारो यद् दीयते लोकहितोन्मुखेन ।
निधानतां याति हि दीयमानम्, अदीयमानं निधनैकनिष्ठम् ।।

अन्वयः – निःसारलघोः (i) ______ स सारः यत् (ii) ______ दीयते । दीयमानं (धनं) (iii) _______ याति (iv) ________ (धनम्) निधनैकनिष्ठं भवति ।

**मञ्जूषा**

| |
|---|
| अदीयमानम्, नरः, लोकहितोन्मुखेन, सोढुम्, निधानताम्, शरीरविमोक्षणात्, धनस्य, कामक्रोधोद्भवम् । |

14. अधोलिखितकथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत ।

निम्नलिखित कथनों का समुचित भाव विकल्पों में से चुनकर लिखिए ।

Choose and write the correct gist of the following sentences from the given options.

**1 × 4 = 4**

(क) स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ।

(i) साहित्यम्

(ii) वाचिकम्

(iii) वाक्युक्तम् ।

(ख) शुश्रूषा श्रवणं चैव ग्रहणं धारणं यथा ।

(i) श्रोतुम् इच्छा

(ii) सेवा

(iii) श्वश्रूः ।

(ग) समाः द्वादश पर्जन्यः तद् राष्ट्रं नाभिवर्षति ।

(i) मेघः

(ii) परितः

(iii) पश्यतः ।

(घ) तदा तस्य पुरतः देवराजः शक्रः उपस्थितः ।

(i) शारदा

(ii) इन्द्रः

(iii) शिल्पम् ।